संस्कृतवार्ता:

दिनाङ्क :-  20/03/2025 सायम्  - 06:20

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

आदौ मुख्यवार्ताः

- अद्य छत्तीसगढ़े द्वयोः भिन्न-घटनयोः त्रिंशत्-माओवादिनः मारिताः।
- पञ्जाबस्य आरक्षिबलेन शम्भू-खनौरी-सीमाभ्यां विरोधं कुर्वन्तः कृषकाः निष्कासिताः। मार्गावरोधकानि अपि हरियाणारक्षकैः निष्कासनीयाः।
- उत्तराखण्डे चारधामयात्रायै पञ्जीकरणं प्रारब्धम् अस्ति।
- अद्य 'नवरोज' उत पारसी-नववर्षः आचर्यते।
- बीसीसीआई इति भारतक्रिकेट्-नियन्त्रणमण्डलेन अद्य पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य आईसीसी चैम्पियन ट्रॉफी इत्यस्यां प्रतिस्पर्धायां विजयानन्तरं भारतीय-दलाय अष्टपञ्चाशत्-कोटिरूप्यकाणां पुरस्कारस्य घोषणा कृता

-----------------------------------

छत्तीसगढ

अद्य छत्तीसगढ़े द्वयोः भिन्न-घटनयोः त्रिंशत्-माओवादिनः मारिताः। माओवादिभिः सह सङ्घर्षे जनपद-रिजर्व-आरक्षिबलस्य एकः आरक्षकः अपि दिवङ्गतः। बीजापुर-दन्तेवाडा-जनपदयोः सीमाक्षेत्रे स्थितेषु वनेषु माओवादिनः उपस्थिताः सन्ति इति गुप्तसूचनाः सुरक्षासेनां प्राप्तानि आसन्। इमां गुप्तसूचनाम् अनुसरन् सुरक्षासेनानां संयुक्तदलेन अन्वेषणकार्यम् आरब्धम्। अद्य प्रातःकालात् गङ्गालूर-क्षेत्रे सुरक्षासेनानां माओवादिनां च मध्ये गोलिकाप्रहारः जातः। अधुना यावत् षड्विंशति-माओवादिनां शरीराणि प्राप्तानि सन्ति। अस्मिन् क्षेत्रे अन्वेषणकार्यम् अधुनापि प्रचलति। छत्तीसगढस्य काङ्केर-जनपदे अन्यस्मिन् अभियाने सुरक्षासेनानां माओवादिनां च मध्ये गोलिकाप्रहारेण चत्वारः माओवादिनः मारिताः।

-----------------------------------

पञ्जाब-कृषकाः

पञ्जाबस्य आरक्षिबलेन शम्भू-खनौरी-सीमाभ्यां विरोधं कुर्वन्तः कृषकाः निष्कासिताः। पञ्जाबस्य आरक्षकैः मार्गस्य निर्मूलनार्थं शम्भू-सीमायाम् अवशिष्टानि अस्थायि-निर्माणानि ध्वस्तं कर्तुं च पुनः कार्यम् आरब्धम्। पञ्जाबस्य कृषकाणां दिल्लीं प्रति गमनं निवारयितुं स्थापितानि मार्ग-अवरोधकानि अपि हरियाणा-आरक्षकैः निष्कासनीयाः।

-----------------------------------

उत्तराखण्ड-चारधामयात्रा

उत्तराखण्डे चारधामयात्रायै पञ्जीकरणं प्रारब्धम् अस्ति। अस्मिन् वर्षे पञ्जीकरणम् आधारप्रमाणीकृतं भविष्यति, पञ्जीकरणकाले श्रद्धालवः स्वस्य आधारपत्राणां विवरणं दातव्यं भविष्यति। ध्यातव्यं वर्तते यत् आहत्य षष्ठी-प्रतिशतं पञ्जीकरणम् आभासीय-माध्यमेन भविष्यति, येन तीर्थयात्रिणां कापि समस्या न भवेत्। एतस्याः प्रक्रियायाः सुगमतायै हरिद्वारं ऋषिकेशं च समेत्य समस्त-यात्रामार्गेषु पञ्जीकरण-केन्द्राणां सङ्ख्या वर्धिता भविष्यति। तीर्थयात्रिणः registrationandtouristcare.uk.gov.in इत्यत्र आभासीय-माध्यमेन पञ्जीकरणं कर्तुं शक्नुवन्ति। भक्तानां सौविध्याय पर्यटनविभागेन अस्मिन् वर्षे यात्रायाः चत्वारिंशत्-दिवसात् पूर्वम् इयं पञ्जीकरणप्रक्रिया समारब्धा।

-----------------------------------

पारसी-नववर्षोत्सवः

अद्य 'नवरोज' उत पारसी-नववर्षः आचर्यते। पारसी-समुदायेन व्यापकस्तरे पर्व एतत् शान्तिसमृद्धेः प्रतीकत्वेन परिपाल्यते। उत्सवस्य अतिरिक्तं नवरोजः पश्चात्तापस्य दिवसः अपि अस्ति। मनः स्वच्छं शुद्धं च कर्तुम् अथ प्रेम्णा शान्त्यै च नूतनवर्षस्य आरम्भं कर्तुं च अयं दिवसो वर्तते। अस्मिन् अवसरे प्रधानमन्त्री नरेन्द्रमोदी जनानाम् अभिवादनं कृतवान्।

-----------------------------------

राष्ट्रपति अमृतोद्यान

राष्ट्रपतिः द्रौपदी मुर्मुः अद्य राष्ट्रपति-भवनस्य अमृतोद्याने उद्यमोत्सवे भागं ग्रहीष्यति। अस्य कार्यक्रमस्य आयोजनं सूक्ष्म-लघु-मध्यमोद्यम-मन्त्रालयेन क्रियते। उद्यमोत्सवस्य उद्देश्यं देशस्य रिक्थं नागरिकानां समीपे आनयन् अथ च सूक्ष्म-लघु-मध्यमोद्यमं सशक्तीकरणं प्रोत्साहनं च वर्तते। अस्य मासस्य त्रिंशत्-दिनाङ्के तस्य समाप्तिः भविष्यति।

-----------------------------------

संसद

लोकसभा-विधानसभा-क्षेत्रयोः प्रस्तावित-परिसीमन् विषयमालक्ष्य डी.एम.के. दलस्य अथ अन्यविपक्ष-सांसदानां च विरोधस्य अनन्तरं संसदः उभे सदने दिवसपर्यन्तं यावत् स्थगिते। लोकसभायाम्, अपराह्णे द्विवादने द्वितीय-स्थगनस्य अनन्तरं यदा सदनोपवेशनं जातम्, तदा सदनं दिवसपर्यन्तं यावत् स्थगितम्, यतः डी.एम्.के. दलस्य सदस्याः पुनः प्रस्तावित-परिसीमन-विषये विरोध-प्रदर्शनं प्रारब्धवन्तः। कोलाहल-कारणेन सदनं आदिवसं यावत् स्थगितम्।

-----------------------------------

कृषिकृषक-कल्याणमन्त्री

कृषिकृषक-कल्याण-राज्यमन्त्री भागीरथ-चौधरी अद्य उक्तवान् यत् केन्द्रप्रशासनं कृषकाणां कल्याणाय प्रतिबद्धमस्ति तथा च अनेन चतुर्दशाधिक-द्विसहस्रतमात् वर्षाद् अस्मिन् क्षेत्रे नैके पदक्षेपाः अपि उत्थापिताः। संसदः बहिः वार्ताहरैः सह संवादं कुर्वन् श्री चौधरी उक्तवान् यत् प्रशासनेन पीएम-किसान-सम्मान-निधि-योजना प्रचालिता तथा च सस्यानां न्यूनतमसमर्थनमूल्ये वृद्धिः कृता।

-----------------------------------

प्रह्लाद जोशी

केन्द्रीयमन्त्री प्रह्लाद जोशी आरोपितवान् यत् डी.एम्.के. दलं तमिलनाडुराज्ये स्वस्य असफलताम् आच्छादयितुं संसदि 'परिसीमन्' इति विषयम् उत्थापयति। संसदः बहिः वार्ताहरैः

सह वार्तां कुर्वन् श्रीजोशी अवदत् यत् केन्द्रप्रशासनं दक्षिणभारते अन्यायं न अनुमन्यते, जनगणनायाः अनन्तरं परिसीमनप्रक्रिया आरभ्यते इति।

अत्रान्तरे दलस्य सांसदः कनिमोझी करुणानिधिः अवदत् यत् दलं निष्पक्ष-परिसीमनस्य आग्रहम् अकरोत् इति।

-----------------------------------

खेलो इण्डिया

केन्द्रीययुव-कार्यक्रम-खेलमन्त्री डा. मनसुख-मण्डाविया अद्य अपराह्णे नवदिल्ल्याम् इन्दिरा-गान्धी-क्रीडाङ्गणे खेलो-इण्डिया-पैरा-गेम्स् इत्यस्य द्वितीय-संस्करणस्य उद्घाटनम् अकरोत्। राष्ट्रिय-राजधान्यां त्रिषु स्थलेषु क्रीडा: आयोज्यन्ते। क्रीडामन्त्री उक्तवान् यत् खेलोइण्डिया-कार्यक्रमान्तर्गतं, भारते क्रीडा-पारिस्थितिकी-तन्त्रं तीव्रतया विकसितं भवति, तथा च क्रीडकानां प्रदर्शने महत्वपूर्ण-परिष्कारः भवति। असौ कथितवान् यत् पेरिस-नगरे आयोजितायां गत-पैरालिम्पिक-प्रतियोगितायां भारतीयक्रीडकाः नवविंशति-पदकानि विजित्य असाधारणप्रदर्शनं कृतवन्तः। असौ अस्य वर्षस्य खेलोइण्डिया-पैरागेम्स इत्येतस्यां प्रतियोगितायां भागग्रहीतेभ्यः क्रीडकेभ्यः शुभकामनाः प्रदत्तवान्।

अयं कार्यक्रमः अद्यारभ्य अस्य मासस्य सप्तविंशति-दिनाङ्कं यावत् दिल्ल्याम् आयोजयिष्यते। त्रयोदश-शताधिकाः क्रीडकाः षड्क्रीडायोजनेषु भागं ग्रहीष्यन्ति। अद्य प्रातः इन्दिरा-गान्धी-क्रीडाङ्गणे पैरा-बैडमिण्टन्-प्रतियोगितायाः उद्घाटनम् अभवत्। जवाहरलाल-नेहरू-क्रीडाङ्गणे श्वः आरभ्य पैरा-एथलेटिक्स, शनिवासरात् पैरा-आर्चरी, रविवासरात् पैरा-पावरलिफ्टिङ्ग् इत्येतस्याः प्रतियोगितायाः आरम्भं भविष्यति। श्वः आरभ्य डा. कर्णी सिंहः शूटिङ्ग्-रेञ्ज इत्यत्र पैरा-शूटिङ्ग्-स्पर्धाः आरभ्यन्ते। अस्य संस्करणस्य कृते पैरा-फ़ुट्बाल् इतीदं निष्कासितम् अस्ति। जनाः दूरदर्शनस्य वाहिन्यां प्रत्यक्षप्रसारणं द्रष्टुं शक्नुवन्ति।

-----------------------------------

बीसीसीआई-सम्मानम्

बीसीसीआई इति भारतक्रिकेट्-नियन्त्रणमण्डलेन अद्य पञ्चविंशत्यधिक-द्विसहस्रतम-वर्षस्य आईसीसी चैम्पियन ट्रॉफी इत्यस्यां प्रतिस्पर्धायां विजयानन्तरं भारतीय-दलाय अष्टपञ्चाशत्-कोटिरूप्यकाणां पुरस्कारस्य घोषणा कृता। मण्डलेन उक्तं यत् एषा वित्तीयमान्यता क्रीडकानां , प्रशिक्षकानां,चयनसमितेः सदस्यानां च सम्मानं करोति।

।। इति वार्ता:।।